श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્ભાગવત રસિક કુટુંબ

## ઉદ્ધવ ગીતા - પ્રથમ સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

### પ્રાર્થના

નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.
દેવીં(મ્) સરસ્વતીં(મ્) વ્યાસં(ન્), તતો જયમુદીરયેત્.

નામસઙ્કીર્તનં(મ્) યસ્ય, સર્વપાપપ્રણાશનમ્.
પ્રણામો દુ:ખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.

.. ૐ નમો ભગવતે વાસુદેવાય ..
.. અથ સપ્તમોઽધ્યાયઃ - ૭ ..

### શ્રીભગવાનુવાચ

યદાત્થ માં(મ્) મહાભાગ, તચ્ચિકીર્ષિતમેવ મે .
બ્રહ્મા ભવો લોકપાલાઃ(સ્), સ્વર્વાસં(મ્) મેઽભિકાઙ્ક્ષિણઃ .. ૧..

તચ્ચિ + કીર્ષિ + તમેવ, મેઽભિ + કાઙ્ક્ષિણઃ

મયા નિષ્પાદિતં(મ્) હ્યત્ર, દેવકાર્યમશેષતઃ .
યદર્થમવતીર્ણોઽહ-મં(વ્)શેન બ્રહ્મણાર્થિતઃ .. ૨..

દેવકાર્ય + મશેષતઃ , યદર્થ + મવ + તીર્ણોઽહ , બ્રહ્મણાર્ + થિતઃ

કુલં(મ્) વૈ શાપનિર્દગ્ધં(ન્), નઙ્ક્ષ્યત્યન્યોન્યવિગ્રહાત્ .

સમુદ્રઃ(સ્) સપ્તમેઽહ્ન્યેતાં(મ્), પુરીં(ઞ્) ચ પ્લાવયિષ્યતિ .. ૩..

નઙ્ક્ષ્યત્ + યન્ + યોન્ય+ વિગ્રહાત્ , સપ્ત + મેઽહ્ + ન્યેતાં(મ્) , પ્લા + વયિષ્યતિ

યર્હ્યેવાયં(મ્) મયા ત્યક્તો, લોકોઽયં(ન્) નષ્ટમં(ઙ્)ગલઃ .

ભવિષ્યત્યચિરાત્ સાધો, કલિનાપિ નિરાકૃતઃ .. ૪..

યર્ + હ્યે + વાયં(મ્) , ભવિષ્યત્ + યચિરાત્

ન વસ્તવ્યં(ન્) ત્વયૈવેહ, મયા ત્યક્તે મહીતલે .

જનોઽધર્મરુચિર્ભદ્ર, ભવિષ્યતિ કલૌ યુગે .. ૫..

જનોઽ + ધર્મ + રુચિર્ + ભદ્ર

ત્વં(ન્) તુ સર્વં(મ્) પરિત્યજ્ય, સ્નેહં(મ્) સ્વજનબન્ધુષુ .

મય્યાવેશ્ય મનઃ(સ્) સમ્યક્, સમદૃગ્ વિચરસ્વ ગામ્ .. ૬..

યદિદં(મ્) મનસા વાચા, ચક્ષુર્ભ્યાં(મ્) શ્રવણાદિભિઃ .

નશ્વરં(ઙ્) ગૃહ્યમાણં(ઞ્) ચ, વિદ્ધિ માયામનોમયમ્ .. ૭..

શ્રવણા + દિભિઃ , માયા + મનો + મયમ્

પું(વ્)સોઽયુક્તસ્ય નાનાર્થો, ભ્રમઃ(સ્) સ ગુણદોષભાક્ .

કર્માકર્મવિકર્મેતિ, ગુણદોષધિયો ભિદા .. ૮..

પું(વ્)સોઽ + યુક્તસ્ય , કર્મા + કર્મ + વિકર્મેતિ

તસ્માદ્ યુક્તેન્દ્રિયગ્રામો, યુક્તચિત્ત ઇદં(ઞ્) જગત્ .

આત્મનીક્ષસ્વ વિતત-માત્માનં(મ્) મય્યધીશ્વરે .. ૯..

યુક્તેન્દ્રિ + યગ્રામો , આત્ + મની + ક્ષસ્વ , મય્ય + ધીશ્વરે

જ્ઞાનવિજ્ઞાનસં(ય્)યુક્ત, આત્મભૂતઃ(શ્) શરીરિણામ્ .

આત્માનુભવતુષ્ટાત્મા, નાન્તરાયૈર્વિહન્યસે .. ૧૦..

જ્ઞાન + વિજ્ઞાન + સં(ય્)યુક્ત , આત્મા + નુભવ + તુષ્ટાત્મા , નાન્ + તરાયૈર્ + વિહન્યસે

દોષબુદ્ધ્યોભયાતીતો, નિષેધાન્ન નિવર્તતે .

ગુણબુદ્ધ્યા ચ વિહિતં(ન્), ન કરોતિ યથાર્ભકઃ .. ૧૧..

દોષ + બુદ્ધ્યો + ભયાતીતો , નિષેધાન્ + ન

સર્વભૂતસુહૃચ્છાન્તો, જ્ઞાનવિજ્ઞાનનિશ્ચયઃ .
પશ્યન્ મદાત્મકં(મ્) વિશ્વં(ન્), ન વિપદ્યેત વૈ પુનઃ .. ૧૨..

સર્વભૂત + સુહૃચ્ + છાન્તો , જ્ઞાન + વિજ્ઞાન + નિશ્ચયઃ

શ્રીશુક ઉવાચ

ઇત્યાદિષ્ટો ભગવતા, મહાભાગવતો નૃપ .
ઉદ્ધવઃ(ફ્) પ્રણિપત્યાહ, તત્ત્વજિજ્ઞાસુરચ્યુતમ્ .. ૧૩..

પ્રણિ + પત્યાહ , તત્ત્વ + જિજ્ઞાસુ + રચ્યુતમ્

ઉદ્ધવ ઉવાચ

યોગેશ યોગવિન્યાસ, યોગાત્મન્ યોગસમ્ભવ .
નિઃ(શ્)શ્રેયસાય મે પ્રોક્તસ્- ત્યાગઃ(સ્) સં(ન્)ન્યાસલક્ષણઃ .. ૧૪..

ત્યાગોઽયં(ન્) દુષ્કરો ભૂમન્, કામાનાં(મ્) વિષયાત્મભિઃ .
સુતરાં(ન્) ત્વયિ સર્વાત્મન્- નભક્તૈરિતિ મે મતિઃ .. ૧૫..

સોઽહં(મ્) મમાહમિતિ મૂઢમતિર્વિગાઢસ્-
ત્વન્માયયા વિરચિતાત્મનિ સાનુબન્ધે .
તત્ત્વઞ્જસા નિગદિતં(મ્) ભવતા યથાહં(મ્),
સં(વ્) સાધયામિ ભગવન્નનુશાધિ ભૃત્યમ્.. ૧૬..

મૂઢ + મતિર્ + વિગાઢસ્ , ત્વન્ + માયયા , ભગવન્ + નનુશાધિ

સત્યસ્ય તે સ્વદૃશ આત્મન આત્મનોઽન્યં(મ્),
વક્તારમીશ વિબુધેષ્વપિ નાનુચક્ષે .
સર્વે વિમોહિતધિયસ્તવ માયયેમે,
બ્રહ્માદયસ્તનુભૃતો બહિરર્થભાવાઃ .. ૧૭..

વિમો + હિત + ધિયસ્ + તવ , બ્રહ્મા + દયસ્ + તનુભૃતો

તસ્માદ્ ભવન્તમનવદ્યમનન્તપારં(મ્),
સર્વજ્ઞમીશ્વરમકુણ્ઠવિકુણ્ઠધિષ્ણ્યમ્ .
નિર્વિણ્ણધીરહમુ હ વૃજિનાભિતપ્તો
નારાયણં(ન્) નરસખં(મ્) શરણં(મ્) પ્રપદ્યે .. ૧૮..

ભવન્ત + મનવદ્ય + મનન્ત + પારં , સર્વજ્ઞમીશ્વર + મકુણ્ઠ + વિકુણ્ઠ + ધિષ્ણ્યમ્
નિર્વિણ્ણ + ધીરહમુ , વૃજિના + ભિતપ્તો

શ્રીભગવાનુવાચ

પ્રાયેણ મનુજા લોકે, લોકતત્ત્વવિચક્ષણાઃ .
સમુદ્ધરન્તિ હ્યાત્માન-માત્મનૈવાશુભાશયાત્ .. ૧૯..

લોક + તત્ત્વ + વિચક્ષણાઃ , સમુદ્ + ધરન્તિ , માત્મ + નૈવા + શુભા + શયાત્

આત્મનો ગુરુરાત્મૈવ, પુરુષસ્ય વિશેષતઃ
યત્ પ્રત્યક્ષાનુમાનાભ્યાં(મ્), શ્રેયોઽસાવનુવિન્દતે .. ૨૦..

ગુરુ + રાત્મૈવ , પ્રત્યક્ષા + નુમાનાભ્યાં , શ્રેયોઽ + સાવ + નુવિન્દતે

પુરુષત્વે ચ માં(ન્) ધીરાઃ(સ્), સાઙ્ખ્યયોગવિશારદાઃ .
આવિસ્તરાં(મ્) પ્રપશ્યન્તિ, સર્વશક્ત્યુપબૃં(વ્)હિતમ્ .. ૨૧..

સાઙ્ખ્ય + યોગ + વિશારદાઃ , સર્વ + શક્ત્યુપ + બૃં(વ્)હિતમ્

એકદ્વિત્રિચતુષ્પાદો, બહુપાદસ્તથાપદઃ .
બહ્વ્યઃ(સ્) સન્તિ પુરઃ(સ્) સૃષ્ટાસ્-તાસાં(મ્) મે પૌરુષી પ્રિયા .. ૨૨..

એકદ્ + વિત્રિ + ચતુષ્ + પાદો , બહુપાદસ્ + તથા + પદઃ

અત્ર માં(મ્) માર્ગયન્ત્યદ્ધા, યુક્તા હેતુભિરીશ્વરમ્ .
ગૃહ્યમાણૈર્ગુણૈર્લિઙ્ગૈ- રગ્રાહ્યમનુમાનતઃ .. ૨૩..

માર્ગયન્ + ત્યદ્ધા , હેતુભિ + રીશ્વરમ્ , ગૃહ્ય + માણૈર્ + ગુણૈર્ + લિઙ્ગૈ

અત્રાપ્યુદાહરન્તીમ- મિતિહાસં(મ્) પુરાતનમ્
અવધૂતસ્ય સં(વ્)વાદં(મ્), યદોરમિતતેજસઃ ૨૪..

અત્રાપ્ + યુદા + હરન્તીમ , યદો + રમિત + તેજસઃ

અવધૂતં(ન્) દ્વિજં(ઙ્) કં(ઞ્)ચિચ્-ચરન્તમકુતોભયમ્ .
કવિં(ન્) નિરીક્ષ્ય તરુણં(મ્), યદુઃ(ફ્) પપ્રચ્છ ધર્મવિત્ .. ૨૫..

ચરન્ + તમ + કુતોભયમ્

યદુરુવાચ

કુતો બુદ્ધિરિયં(મ્) બ્રહ્મન્-નકર્તુઃ(સ્) સુવિશારદા .
યામાસાદ્ય ભવાઁલ્લોકં(મ્), વિદ્વાં(વ્)શ્ચરતિ બાલવત્ .. ૨૬..

વિદ્ + વાં(વ્)શ્ + ચરતિ

પ્રાયો ધર્માર્થકામેષુ, વિવિત્સાયાં(ઞ્) ચ માનવાઃ .
હેતુનૈવ સમીહન્તે, આયુષો યશસઃ(શ્) શ્રિયઃ .. ૨૭..

ધર્માર્થ + કામેષુ

ત્વં(ન્) તુ કલ્પઃ(ખ્) કવિર્દક્ષઃ(સ્), સુભગોઽમૃતભાષણઃ .
ન કર્તા નેહસે કિં(ઞ્)ચિજ્- જડોન્મત્તપિશાચવત્ .. ૨૮..

સુભગોઽ + મૃત + ભાષણઃ

જડોન્ + મત્ત + પિશાચવત્

જનેષુ દહ્યમાનેષુ, કામલોભદવાગ્નિના .
ન તપ્યસેઽગ્નિના મુક્તો , ગં(ઙ્)ગામ્ભઃ(સ્)સ્થ ઇવ દ્વિપઃ .. ૨૯..

કામલો + ભદ + વાગ્નિના , ગં(ઙ્)ગામ્ + ભઃ(સ્)સ્થ

ત્વં(મ્) હિ નઃ(ફ્) પૃચ્છતાં(મ્) બ્રહ્મન્-નાત્મન્યાનન્દકારણમ્ .
બ્રૂહિ સ્પર્શવિહીનસ્ય, ભવતઃ(ખ્) કેવલાત્મનઃ .. ૩૦..

નાત્મન્યા + નન્દકારણમ્ , સ્પર્શ + વિહીનસ્ય

શ્રીભગવાનુવાચ

યદુનૈવં(મ્) મહાભાગો, બ્રહ્મણ્યેન સુમેધસા.
પૃષ્ટઃ(સ્) સભાજિતઃ(ફ્) પ્રાહ, પ્રશ્રયાવનતં(ન્) દ્વિજઃ .. ૩૧..

પ્રશ્રયા + વનતં(ન્)

બ્રાહ્મણ ઉવાચ

સન્તિ મે ગુરવો રાજન્, બહવો બુદ્ધ્યુપાશ્રિતાઃ .
યતો બુદ્ધિમુપાદાય, મુક્તોઽટામીહ તાઞ્છૃણુ .. ૩૨..

બુદ્ + ધ્યુ + પાશ્રિતાઃ , બુદ્ધિ + મુપાદાય , મુક્તોઽ + ટામીહ

પૃથિવી વાયુરાકાશ-માપોઽગ્નિશ્ચન્દ્રમા રવિઃ .
કપોતોઽજગરઃ(સ્) સિન્ધુઃ(ફ્), પત(ઙ્)ગો મધુકૃદ્ ગજઃ .. ૩૩..

માપોઽગ્નિશ્ + ચન્દ્રમા

મધુહા હરિણો મીનઃ(ફ), પિ(ઙ્)ગલા કુરરોઽર્ભકઃ.
કુમારી શરકૃત્ સર્પ, ઊર્ણનાભિઃ(સ્) સુપેશકૃત્ .. ૩૪..

કુરરોઽર્ + ભકઃ

એતે મે ગુરવો રાજં(વ્)શ્- ચતુર્વિં(વ્)શતિરાશ્રિતાઃ .
શિક્ષા વૃત્તિભિરેતેષા- મન્વશિક્ષમિહાત્મનઃ .. ૩૫..

ચતુર્ + વિં(વ્)શતિ + રાશ્રિતાઃ , વૃત્તિ + ભિરે + તેષા , મન્વ + શિક્ષ + મિહાત્મનઃ

યતો યદનુશિક્ષામિ, યથા વા નાહુષાત્મજ .
તત્તથા પુરુષવ્યાઘ્ર, નિબોધ કથયામિ તે .. ૩૬..

યદનુ + શિક્ષામિ , તત્ + તથા

ભૂતૈરાક્રમ્યમાણોઽપિ, ધીરો દૈવવશાનુગૈઃ.
તદ્ વિદ્વાન્ન ચલેન્માર્ગા-દન્વશિક્ષં(ઙ્) ક્ષિતેર્વ્રતમ્ .. ૩૭..

ભૂતૈ + રાક્રમ્ય + માણોઽપિ , દૈવ + વશાનુગૈઃ

શશ્વત્પરાર્થસર્વેહઃ(ફ્), પરાર્થૈકાન્તસમ્ભવઃ .
સાધુઃ(શ્) શિક્ષેત ભૂભૃત્તો, નગશિષ્યઃ(ફ્) પરાત્મતામ્ .. ૩૮..

શશ્વત્ + પરાર્થ + સર્વેહઃ(ફ્) , પરાર્ + થૈકાન્ત + સમ્ભવઃ

પ્રાણવૃત્ત્યૈવ સન્તુષ્યેન્- મુનિર્નૈવેન્દ્રિયપ્રિયૈઃ .
જ્ઞાનં(મ્) યથા ન નશ્યેત, નાવકીર્યેત વાઙ્મનઃ .. ૩૯..

પ્રાણ + વૃત્ + ત્યૈવ , મુનિર્ + નૈવેન્દ્રિ + યપ્રિયૈઃ , નાવ + કીર્ + યેત

વિષયેષ્વાવિશન્ યોગી, નાનાધર્મેષુ સર્વતઃ .
ગુણદોષવ્યપેતાત્મા, ન વિષજ્જેત વાયુવત્ .. ૪૦..

વિષયેષ્ + વાવિશન્ , ગુણદોષ + વ્યપે + તાત્મા

પાર્થિવેષ્વિહ દેહેષુ, પ્રવિષ્ટસ્તદ્ગુણાશ્રયઃ .
ગુણૈર્ન યુજ્યતે યોગી, ગન્ધૈર્વાયુરિવાત્મદૃક્ .. ૪૧..

પાર્થિ + વેષ્વિહ , પ્રવિષ્ટસ્ + તદ્ + ગુણાશ્રયઃ, ગન્ધૈર્ + વાયુ + રિવાત્મ + દૃક્

અન્તર્હિતશ્ચ સ્થિરજં(ઙ્)ગમેષુ,
બ્રહ્માત્મભાવેન સમન્વયેન .
વ્યાપ્ત્યાવ્યવચ્છેદમસં(ઙ્)ગમાત્મનો,
મુનિર્નભસ્ત્વં(મ્) વિતતસ્ય ભાવયેત્ .. ૪૨..

સ્થિર + જં(ઙ્)ગમેષુ , વ્યાપ્ત્યા + વ્યવચ્છે + દમસં(ઙ્)ગ + માત્મનો , મુનિર્ + નભસ્ + ત્વં(મ્)

તેજોઽબન્નમયૈર્ભાવૈર્- મેઘાદ્યૈર્વાયુનેરિતૈઃ .
ન સ્પૃશ્યતે નભસ્તદ્વત્, કાલસૃષ્ટૈર્ગુણૈઃ(ફ્) પુમાન્ .. ૪૩..

તેજોઽ + બન્ન + મયૈર્ + ભાવૈર્ , મેઘા + દ્યૈર્ + વાયુ + નેરિતૈઃ નભસ્ + તદ્ + વત્

કાલ + સૃષ્ટૈર્ + ગૂણૈઃ(ફ્)

સ્વચ્છઃ(ફ્) પ્રકૃતિતઃ(સ્) સ્નિગ્ધો, માધુર્યસ્તીર્થભૂર્નૃણામ્ .
મુનિઃ(ફ્) પુનાત્યપાં(મ્) મિત્ર- મીક્ષોપસ્પર્શકીર્તનૈઃ .. ૪૪..

માધુર્યસ્ + તીર્થ + ભૂર્ + નૃણામ્ , મીક્ષો + પસ્પર્શ + કીર્તનૈઃ

તેજસ્વી તપસા દીપ્તો, દુર્ધર્ષોદરભાજનઃ .
સર્વભક્ષોઽપિ યુક્તાત્મા, નાદત્તે મલમગ્નિવત્ .. ૪૫..

દુર્ + ધર્ + ષોદર + ભાજનઃ મલ + મગ્નિ + વત્

ક્વચિચ્છન્નઃ(ખ્) કવચિત્ સ્પષ્ટ, ઉપાસ્યઃ(શ્) શ્રેય ઇચ્છતામ્ .
ભુઙ્ક્તે સર્વત્ર દાતૄણાં(ન્), દહન્ પ્રાગુત્તરાશુભમ્ .. ૪૬..

ક્વચિચ્ + છન્નઃ(ખ્) , પ્રાગુત્ + તરા + શુભમ્

સ્વમાયયા સૃષ્ટમિદં(મ્), સદસલ્લક્ષણં(મ્) વિભુઃ .
પ્રવિષ્ટ ઈયતે તત્તત્ – સ્વરૂપોઽગ્નિરિવૈધસિ .. ૪૭..

સદસલ્ + લક્ષણં(મ્) , તત્ + તત્ , સ્વરૂપોઽગ્ + નિરિ + વૈધસિ

વિસર્ગાદ્યાઃ(શ્) શ્મશાનાન્તા, ભાવા દેહસ્ય નાત્મનઃ .
કલાનામિવ ચન્દ્રસ્ય, કાલેનાવ્યક્તવર્ત્મના .. ૪૮..

શ્મશા + નાન્તા , કાલેના + વ્યક્ત + વર્ત્મના

કાલેન હ્યોઘવેગેન, ભૂતાનાં(મ્) પ્રભવાપ્યયૌ .
નિત્યાવપિ ન દૃશ્યેતે, આત્મનોઽગ્નેર્યથાર્ચિષામ્ .. ૪૯..

હ્યોઘ + વેગેન , આત્મનોઽગ્ + નેર્ + યથાર્ + ચિષામ્

ગુણૈર્ગુણાનુપાદત્તે, યથાકાલં(મ્) વિમુઞ્ચતિ .
ન તેષુ યુજ્યતે યોગી, ગોભિર્ગા ઇવ ગોપતિઃ .. ૫૦..

ગુણૈર્ + ગુણા + નુપા + દત્તે

બુધ્યતે સ્વે ન ભેદેન, વ્યક્તિસ્થ ઇવ તદ્ગતઃ .
લક્ષ્યતે સ્થૂલમતિભિ-રાત્મા ચાવસ્થિતોઽર્કવત્ .. ૫૧..

નાતિસ્નેહઃ(ફ્) પ્રસઙ્ગો વા, કર્તવ્યઃ(ખ્) ક્વાપિ કેનચિત્ .
કુર્વન્ વિન્દેત સન્તાપં(ઙ્), કપોત ઇવ દીનધીઃ .. ૫૨..

કપોતઃ(ખ્) કશ્ચનારણ્યે, કૃતનીડો વનસ્પતૌ .
કપોત્યા ભાર્યયા સાર્ધ-મુવાસ કતિચિત્સમાઃ .. ૫૩..

કશ્ + ચના + રણ્યે

કપોતૌ સ્નેહગુણિત-હૃદયૌ ગૃહધર્મિણૌ .
દૃષ્ટિં(ન્) દૃષ્ટ્યાં(ઙ્) ગમં(ઙ્)ગેન, બુદ્ધિં(મ્) બુદ્ધ્યા બબન્ધતુઃ .. ૫૪..

દૃષ્ટ્યાં(ઙ્) + ગમં(ઙ્) + ગેન

શય્યાસનાટનસ્થાન-વાર્તાક્રીડાશનાદિકમ્ .
મિથુનીભૂય વિશ્રબ્ધૌ, ચેરતુર્વનરાજિષુ .. ૫૫..

શય્યા + સના + ટનસ્થાન , વાર્તા + ક્રીડા + શના + દિકમ્ ચેરતુર્ + વન + રાજિષુ

યં(મ્) યં(મ્) વાઞ્છતિ સા રાજં(વ્)સ્ - તર્પયન્ત્યનુકમ્પિતા .
તં(ન્) તં(મ્) સમનયત્કામં(ઙ્), કૃચ્છ્રેણાપ્યજિતેન્દ્રિયઃ .. ૫૬..

તર્પયન્ + ત્યનુ + કમ્પિતા સમનયત્ + કામં(ઙ્) , ફચ્છે + ણાપ્ય + જિતેન્દ્રિયઃ

કપોતી પ્રથમં(ઙ્) ગર્ભં, ગૃહ્ણતી કાલ આગતે .
અણ્ડાનિ સુષુવે નીડે, સ્વપત્યુઃ(સ્) સન્નિધૌ સતી .. ૫૭..

તેષુ કાલે વ્યજાયન્ત, રચિતાવયવા હરેઃ .
શક્તિભિર્દુર્વિભાવ્યાભિઃ(ખ્), કોમલાં(ઙ્)ગતનૂરુહાઃ .. ૫૮..

રચિતા + વયવા , શક્તિભિર્ + દુર્વિભા + વ્યાભિઃ(ખ્)

પ્રજાઃ(ફ્) પુપુષતુઃ(ફ્) , પ્રીતૌ, દમ્પતી પુત્રવત્સલૌ .
શૃણ્વન્તૌ કૂજિતં(ન્) તાસાં(ન્), નિર્વૃતૌ કલભાષિતૈઃ .. ૫૯..

તાસાં(મ્) પતત્રૈઃ(સ્) સુસ્પર્શૈઃ(ખ્), કૂજિતૈર્મુગ્ધચેષ્ટિતૈઃ .
પ્રત્યુદ્ગમૈરદીનાનાં(મ્), પિતરૌ મુદમાપતુઃ .. ૬૦..

કૂજિતૈર્ + મુગ્ધ + ચેષ્ટિતૈઃ પ્રત્યુદ્ + ગમૈ + રદીનાનાં(મ્)

સ્નેહાનુબદ્ધહૃદયા-વન્યોન્યં(મ્) વિષ્ણુમાયયા .
વિમોહિતૌ દીનધિયૌ, શિશૂન્ પુપુષતુઃ(ફ્) પ્રજાઃ .. ૬૧..

સ્નેહા + નુબદ્ધ + હૃદયા

એકદા જગ્મતુસ્તાસા-મન્નાર્થં(ન્) તૌ કુટુમ્બિનૌ .
પરિતઃ(ખ્) કાનને તસ્મિન્- નર્થિનૌ ચેરતુશ્ચિરમ્ .. ૬૨..

જગ્ + મતુસ્ + તાસા , મન્ + નાર્થં(ન્) , ચેરતુશ્ + ચિરમ્

દૃષ્ટ્વા તાઁલ્લુબ્ધકઃ(ખ્) કશ્ચિદ્, યદૃચ્છાતો વનેચરઃ .
જગૃહે જાલમાતત્ય, ચરતઃ(સ્) સ્વાલયાન્તિકે .. ૬૩..

તાઁલ્ + લુબ્ધકઃ(ખ્) , જાલ + માતત્ય , સ્વા + લયાન્ + તિકે

કપોતશ્ચ કપોતી ચ, પ્રજાપોષે સદોત્સુકૌ .
ગતૌ પોષણમાદાય, સ્વનીડમુપજગ્મતુઃ .. ૬૪..

સદોત્ + સુકૌ , પોષણ + માદાય , સ્વની + ડમુપ + જગ્મતુઃ

કપોતી સ્વાત્મજાન્ વીક્ષ્ય, બાલકાન્ જાલસંવૃતાન્ .
તાનભ્યધાવત્ક્રોશન્તી, ક્રોશતો ભૃશદુઃખિતા .. ૬૫..

સ્વાત્ + મજાન્ , જાલ + સંવૃતાન્ , તાનભ્ય + ધાવત્ + ક્રોશન્તી , ભૃશ + દુઃખિતા

સાસકૃત્સ્નેહગુણિતા, દીનચિત્તાજમાયયા .

સ્વયં(ઞ્) ચાબધ્યત શિચા, બધ્દ્વાન્ પશ્યન્ત્યપસ્મૃતિઃ .. ૬૬..

સાસકૃત્ + સ્નેહ + ગુણિતા , દીન + ચિત્તા + જમાયયા પશ્યન્ત્ય + પસ્મૃતિઃ

કપોતશ્ચાત્મજાન્ બધ્દ્વા- નાત્મનોઽપ્યધિકાન્ પ્રિયાન્ .

ભાર્યાં(ઞ્) ચાત્મસમાં(ન્) દીનો, વિલલાપાતિદુઃખિતઃ .. ૬૭..

કપોતશ્ + ચાત્મજાન્ , નાત્મનોઽ + પ્યધિકાન્ , ચાત્ + મસમાં(ન્) , વિલલા + પાતિ + દુઃખિતઃ

અહો મે પશ્યતાપાય-મલ્પપુણ્યસ્ય દુર્મતેઃ .

અતૃપ્તસ્યાકૃતાર્થસ્ય, ગૃહસ્ત્રૈવર્ગિકો હતઃ .. ૬૮..

પશ્ય + તાપાય , મલ્પ + પુણ્યસ્ય , અતૃપ્તસ્ + યાકૃતાર્ + થસ્ય , ગૃહસ્ + ત્રૈવર્ + ગિકો

અનુરૂપાનુકૂલા ચ, યસ્ય મે પતિદેવતા .

શૂન્યે ગૃહે માં(મ્) સન્ત્યજ્ય, પુત્રૈઃ(સ્) સ્વર્યાતિ સાધુભિઃ .. ૬૯..

અનુરૂપા + નુકૂલા , સન્ + ત્યજ્ય

સોઽહં(મ્) શૂન્યે ગૃહે દીનો, મૃતદારો મૃતપ્રજઃ .

જિજીવિષે કિમર્થં(મ્) વા, વિધુરો દુઃખજીવિતઃ .. ૭૦..

તાં(વ્)સ્તથૈવાવૃતાઞ્છિગ્ભિર્ - મૃત્યુગ્રસ્તાન્ વિચેષ્ટતઃ .

સ્વયં(ઞ્) ચ કૃપણઃ(શ્) શિક્ષુ, પશ્યન્નપ્યબુધોઽપતત્ .. ૭૧..

તાં(વ્)સ્+ તથૈવા + વૃતાઞ્ + છિગ્ભિર્ , મૃત્યુ + ગ્રસ્તાન્ , પશ્યન્ + નપ્ય + બુધોઽપતત્

તં(મ્) લબ્ધ્વા લુબ્ધકઃ(ખ્) ક્રૂરઃ(ખ્), કપોતં(ગ્) ગૃહમેધિનમ્ .

કપોતકાન્ કપોતીં(ઞ્) ચ, સિધ્દ્વાર્થઃ(ફ્) પ્રયયૌ ગૃહમ્ .. ૭૨..

એવં(ગ્) કુટુમ્બ્યશાન્તાત્મા, દ્વન્દ્વારામઃ(ફ્) પતત્ત્રિવત્ .

પુષ્ણન્ કુટુમ્બં(ગ્) કૃપણઃ(સ્), સાનુબન્ધોઽવસીદતિ .. ૭૩..

કુટુમ્બ્ય + શાન્તાત્મા ,પતત્ + ત્રિવત્ ,સાનુબન્ધોઽ + વસીદતિ

યઃ(ફ્) પ્રાપ્ય માનુષં(મ્) લોકં(મ્), મુક્તિદ્વારમપાવૃતમ્ .

ગૃહેષુ ખગવત્ સક્તસ્ -તમારૂઢચ્યુતં(મ્) વિદુઃ .. ૭૪..

મુક્તિ + દ્વાર + મપાવૃતમ્ તમા + રૂઢ + ચ્યુતં(મ્)

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(વ્)સ્યાં(મ્)
સં(વ્)હિતાયામેકાદશસ્કન્ધે સપ્તમોઽધ્યાયઃ ..

ૐ પૂર્ણમદ:(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.
ૐ શાન્તિ:(શ્) શાન્તિ:(શ્) શાન્તિ:

